मिनः संयोगविभागधर्माणः इतरेतरोपाश्रयेणोर्ज्जितमूर्त्तयः परस्पराङ्गाङ्गित्वेऽप्यसम्भिन्नशक्तिप्रविभागास्तुल्यजातीयाऽतुल्यजातीयशक्तिभेदानुपातिनः। प्रधानवेलायामुपदर्शितसन्निधाना गुणत्वेऽपि च व्यापारमात्रेण प्रधानान्तर्नीतानुमितास्तिताः पुरुषार्थकर्त्तव्या अयस्कान्तमणिकल्पाः प्रत्ययमन्तरेण एकतमस्य वृत्तिमनुवर्तमानाः प्रधानशब्दवाच्या भवन्ति। एतद्दृश्यमित्युच्यते। तदेतद्भूतेन्द्रियात्मकं भूतभावेन पृथिव्यादिना सूक्ष्मस्थूलेन परिणमते तथेन्द्रियभावेन श्रोत्रादिना सूक्ष्मस्थूलेन परिणमत इति। तत्तु नाप्रयोजनम् अपि तु प्रयोजनमुररीकृत्य प्रवर्तत इति भोगापवर्गार्थं हि तद् दृश्यं पुरुषस्येति तत्रेष्टानिष्टगुणस्वरूपावधारणम् अविभागापन्नं भोगो भोक्तुः स्वरूपावधारणमपवर्ग इति द्वयोरतिरिक्तमन्यद्दर्शनं नास्ति" भा० ग्रहाणां नक्षत्राणां च कालांशविशेषेण सूर्यसान्निध्ये अदृश्यत्वं सू० सि० उक्तम् अस्तशब्दे ५६३पृ०दर्शितम् उदयशब्दे ११४४।४५ पृ० दृश्यत्वं च दर्शितं ततएवावगन्तव्यम्।

**दृश्य(ष्ट)** जाति न० लीला० उक्ते दृष्टकर्मरूपे गणितभेदे दृष्टकर्मन् शब्दे ६६७ पृ० तत्प्रकारो दृश्यः।

**दृश्यादृश्य** त्रि० दृश्यश्च अदृश्यश्च द्वन्द्व०। १दृश्ये अदृश्ये च "अष्टादशशताभ्यस्ता दृश्यांशाः स्वोदयासुभिः। विभज्य लब्धाः क्षेत्रांशैस्तैर्दृश्यादृश्यताथ वा" सू० सि०। "दृश्या चासौ अदृश्या च" कर्म०। "सा दृष्टेन्दुः सिनीवाली" अमरोक्तेः किञ्चिद्दर्शनेन दृश्यचन्द्रायाम् किञ्चिद्दर्शनेन अदृश्यचन्द्रायाञ्च २सिनीवाल्यां स्त्री तस्यां चन्द्रस्य दर्शनादर्शनयोः सत्त्वात् तथात्वम्। ३तदभिमानिदेवतायाञ्च सा च अङ्गिरसस्तृतीयकन्या यथाह भा०व० २१७अ० "यां कपर्दिसुतामाहुर्दृश्यादृश्येति देहिनः। तनुत्वात् सा सिनीवाली तृतीयाऽङ्गिरसः सुता"

**दृश्वन्** त्रि० दृश–क्वनिप्। दर्शके "विवेकदृश्वत्वमगात् सुराणाम्" भट्टिः "अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः"। "गुर्वर्थमर्थी श्रुतपारदृश्वा" रघुः।

**दृषत्सार** न० दृषदः सारमिव। मुण्डायसे राजनि०।

**दृषद्** स्त्री दृ–अदि पुक् ह्रस्वश्च। १शिलायां २पेषणशिलायाञ्च मेदि० तत्र शिलायां "गुर्वीरजस्रं दृषदः समन्तात्" माघः। "दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः" कुमा० "तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः" मेघ०। पेषणशिलायाम् "पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाप्य" आश्व० गृ० १।७।२ "अपामग्नेः सुरेशस्य दृषदोलूखलस्य च। चतुर्दैवानि चत्वारि द्वाराणि विदधुश्च ते" हरिवं०११६अ०। दृषदोलूखलमित्यत्र राजदन्ता०पूर्वनि०। दृषदि पिष्टाः अण्। दार्षद, दृषदि पिष्टे त्रि०

**दृषदिमाषक** पु० माषः शुल्कत्वेन दीयते कन् दृषदि पेषणव्यवहारे राज्ञे देयः माषकः "कारनाम्नि च प्राचां हलादौ" पा० अलुक् समा०। पेषणव्यवहारे राजदेये माषरूपे करे।

**दृषद्वत्** त्रि० दृषदः सन्त्यस्मिन् भूम्ना मतुप् मस्य वः। १दृषद्युक्ते स्त्रियां ङीप्। सा च २नदीभेदे "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते" मनुः "प्रययुर्जाह्नवीकूलात् कुरुक्षेत्रं महानुगाः। सरस्वतीदृषद्वत्यौ यमुनाञ्च निषेव्य ते। ययुर्वनेनैव वनं सततं पश्चिमां दिशम्" भा०व० ५अ०। "कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती" भाग० ५।१६।१८ भारतवर्षस्थमहानदीकथने। "दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च। ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिपिष्टपे" भा०व० ८३अ०। ३नृपभेदे पु० "संयातिः खलु दृषद्वतो दुहितरं वराङ्गीं नामोपयेमे तस्यामस्य जज्ञे सार्वभौमः" भा०आ० ९५अ०। विश्वामित्रस्य ४पत्नीभेदे स्त्री "दृषद्वतीसुतश्चापि विश्वामित्रात्तथाऽष्टकः। अष्टकस्य सुतो लौहिः प्रोक्तो जह्नुगणो मया" हरिवं०२७अ०

**दृष्ट** त्रि० दृश–कर्मणि क्त। १दर्शनकर्मणि विलोकिते "दृष्टदोषेऽपि विषये ममत्वाकृष्टचेतनः" देवीमा० "द्यूतमेतत् पुराकल्पे दृष्टं वैरकरं महत्" "तस्य ह भागिनौ दृष्टौ वीजी क्षेत्रिक एव च" मनुः २ज्ञातमात्रे च "दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः" सा० का० "दृष्टानुश्रविकविषयवितृष्णा वशीकारसंज्ञा वैराग्यम्" पात०सू० "दृष्टं श्रुतञ्चेत्युपासीत" छा०उप०। भावे क्त। ३दर्शने ४राज्ञां स्वराष्ट्रस्थात् चौरादेर्भये ५परराष्ट्रात् दाहविलोपादेर्भये च न० अमरः। ६साक्षात्कारे न० "दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्। त्रिविधं प्रमाणमिष्टम्" सा०का० उद्दिश्य तल्लक्षितं यथा

"प्रतिविषयाध्यवसायो दृष्टं, त्रिविधमनुमानमाख्यातम्" सा०का० "अत्र दृष्टमिति लक्ष्यनिर्देशः परिशिष्टन्तु लक्षणं समानासमानजातीयव्यवच्छेदो लक्षणार्थः। अवयवार्थस्तु विषिण्वन्ति विषयिणमनुबध्नन्ति